# Shri Nrisinha Ashtottarashatanama Stotram 2

# શ્રીનૃસિંહાષ્ટોત્તરશતનામસ્તોત્રમ્ ૨

## Document Information

Text title : nRisi.nhAShTottarashatanAmastotra.n 2

File name : nRisinha108str-2.itx

Category : aShTottarashatanAma, vishhnu, dashAvatAra, stotra, vishnu

Location : doc_vishhnu

Transliterated by : N.Balasubramanian bbalu at satyam.net.in

Proofread by : N.Balasubramanian bbalu at satyam.net.in

Description-comments : brahmANDapurANe. See corresponding nAmAvalI.

Latest update : July 13, 2008

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

February 5, 2025

*sanskritdocuments.org*

Shri Nrisinha Ashtottarashatanama Stotram 2

# શ્રીનૃસિંહાષ્ટોત્તરશતનામસ્તોત્રમ્ ૨

॥ શ્રીઃ ॥

। રુદ્રાદ્યા ઊચુઃ ।
ॐ નમો નારસિંહાય તીક્ષ્ણ-દંષ્ટ્રાય તે નમઃ ।
નમો વજ્ર-નખાયૈવ વિષ્ણવે જિષ્ણવે નમઃ ॥ ૧॥

સર્વબીજાય સત્યાય સર્વચૈતન્ય-રૂપિણે ।
સર્વાધારાય સર્વસ્મૈ સર્વગાય નમો નમઃ ॥ ૨॥

વિશ્વસ્મૈ વિશ્વવન્દ્યાય વિરિઞ્ચિ-જનકાય ચ ।
વાગીશ્વરાય વેદ્યાય વેધસે વેદમૌલયે ॥ ૩॥

નમો રુદ્રાય ભદ્રાય મઙ્ગલાય મહાત્મને ।
કરુણાય તુરીયાય શિવાય પરમાત્મને ॥ ૪॥

હિરણ્યકશિપુ-પ્રાણ-હરણાય નમો નમઃ ।
પ્રહ્લાદ-ધ્યાયમાનાય પ્રહ્લાદાર્તિ-હરાય ચ ॥ ૫॥

પ્રહ્લાદ-સ્થિરસામ્રાજ્ય-દાયકાય નમો નમઃ ।
દૈત્ય-વક્ષોવિદલન-વ્યગ્ર-વજ્રનખાય ચ ॥ ૬॥

આન્ત્રમાલા-વિભૂષાય મહારૌદ્રાય તે નમઃ ।
નમ ઉગ્રાય વીરાય જ્વલતે ભીષણાય ચ ॥ ૭॥

સર્વતોમુખ-દુર્વાર-તેજો-વિક્રમશાલિને ।
નરસિંહાય રૌદ્રાય નમસ્તે મૃત્યુમૃત્યવે ॥ ૮॥

મત્સ્યાદ્યનન્ત-કલ્યાણ-લીલા-વૈભવકારિણે ।
નમો વ્યૂહચતુષ્કાય દિવ્યાર્ચા-રૂપધારિણે ॥ ૯॥

પરસ્મૈ પાઞ્ચજન્યાદિ-પઞ્ચ-દિવ્યાયુધાય ચ ।
ત્રિસામ્ને ચ ત્રિધામ્ને ચ ત્રિગુણાતીત-મૂર્તયે ॥ ૧૦॥

યોગારૂઢાય લક્ષ્યાય માયાતીતાય માયિને ।
મન્ત્રરાજાય દુર્દોષ-શમનાયેષ્ટદાય ચ ॥ ૧૧॥

નમઃ કિરીટ-હારાદિ-દિવ્યાભરણ-ધારિણે ।
સર્વાલઙ્કાર-યુક્તાય લક્ષ્મીલોલાય તે નમઃ ॥ ૧૨॥

આકણ્ઠ-હરિરૂપાય ચાકણ્ઠ-નરરૂપિણે ।
ચિત્રાય ચિત્રરૂપાય જગચ્ચિત્રતરાય ચ ॥ ૧૩॥

સર્વ-વેદાન્ત-સિદ્ધાન્ત-સારસત્તમયાય ચ ।
સર્વ-મન્ત્રાધિદેવાય સ્તમ્ભ-ડિમ્ભાય શમ્ભવે ॥ ૧૪॥

નમોઽસ્ત્વનન્ત-કલ્યાણગુણ-રત્નાકરાય ચ ।
ભગવચ્છબ્દ-વાચ્યાય વાગતીતાય તે નમઃ ॥ ૧૫॥

કાલરૂપાય કલ્યાય સર્વજ્ઞાયાઘહારિણે ।
ગુરવે સર્વસત્કર્મ-ફલદાય નમો નમઃ ॥ ૧૬॥

અશેષ-દોષદૂરાય સુવર્ણાયાત્મદર્શિને ।
વૈકુણ્ઠપદ-નાથાય નમો નારાયણાય ચ ॥ ૧૭॥

કેશવાદિ-ચતુર્વિંશત્યવતાર-સ્વરૂપિણે ।
જીવેશાય સ્વતન્ત્રાય મૃગેન્દ્રાય નમો નમઃ ॥ ૧૮॥

બ્રહ્મરાક્ષસ-ભૂતાદિ-નાનાભય-વિનાશિને ।
અખણ્ડાનન્દ-રૂપાય નમસ્તે મન્ત્રમૂર્તયે ॥ ૧૯॥

સિદ્ધયે સિદ્ધિબીજાય સર્વદેવાત્મકાય ચ ।
સર્વ-પ્રપઞ્ચ-જન્માદિ-નિમિત્તાય નમો નમઃ ॥ ૨૦॥

શઙ્કરાય શરણ્યાય નમસ્તે શાસ્ત્રયોનયે ।
જ્યોતિષે જીવરૂપાય નિર્ભેદાય નમો નમઃ ॥ ૨૧॥

નિત્યભાગવતારાધ્ય સત્યલીલા-વિભૂતયે ।
નરકેસરિતાવ્યક્ત-સદસન્મય-મૂર્તયે ॥ ૨૨॥

સત્તામાત્ર-સ્વરૂપાય સ્વાધિષ્ઠાનાત્મકાય ચ ।
સંશયગ્રન્થિ-ભેદાય સમ્યગ્જ્ઞાન-સ્વરૂપિણે ॥ ૨૩॥

સર્વોત્તમોત્તમેશાય પુરાણ-પુરુષાય ચ ।
પુરુષોત્તમરૂપાય સાષ્ટાઙ્ગં પ્રણતોઽસ્મ્યહમ્ ॥ ૨૪॥

નામ્નામષ્ટોત્તરશતં શ્રીનૃસિંહસ્ય યઃ પટેત્ ।
સર્વપાપ-વિનિર્મુક્તઃ સર્વેષ્ટાર્થાનવાપ્નુયાત્ ॥ ૨૫॥

॥ ઇતિ શ્રીબ્રહ્માણ્ડપુરાણે નૃસિંહાષ્ટોત્તર-શતનામ-સ્તોત્રં સમ્પૂર્ણમ્ ॥

Encoded and proofread by N. Balasubramanian

---

*Shri Nrisinha Ashtottarashatanama Stotram 2*

pdf was typeset on February 5, 2025

Please send corrections to *sanskrit@cheerful.com*